# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 5 - CC - 3.5.9** | **समयः - 3 तः 6** |
| **दिनाङ्कः- 14/10/2019** | **सन्दर्भग्रन्थः –** श्रीमद्भागवतमहापुराणे २-८ स्कन्धौ | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भप्रसङ्गं व्याख्यायताम्। 10**

1. वरीयानेष ते प्रश्नः कृतो लोकहितो नृप।
   आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ।।
2. सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहो स्वसिद्धे ह्युपबर्हणैः किम्।
   सत्यञ्जलौ किं पुरुधाऽन्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ।।
3. तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः।
   क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ।।

**प्र-2 भगवतो विराट्स्वरूपवर्णनं कुरुत। 10**

**अथवा**

**ध्यानविधिः ग्रन्थोक्तदिशा निरूप्यताम्।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः व्याखा कार्या। 10**

1. तत्कथा सुमहत्पुण्यं धन्यं स्वस्त्ययनं शुभम्।
   यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ।।
2. न यस्य देवा ऋषयः पदं विदुर्जन्तु पुनः कोऽर्हति गन्तुमीरितुम्।
   यथा नटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणः स माऽवतु ।।
3. धर्मः क्वचित् तत्र न भूतसौहृदं त्यागः क्वचित् तत्र न मुक्तिकारणम्।
   वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ।।

**प्र-4 गजेन्द्रमोक्ष - आख्यानं विस्तारेण वर्णयत। 10**

**अथवा**

**समुद्रमंथन - आख्यानं विस्तारेण वर्णयत।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या। 10**

1. गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि।

यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ।।

2. अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ।
   अद्य स्विष्टः क्रतुरयं यद् भवानागतो गृहान् ।।
3. प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ।
   दितिजमकथयद् यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्वमीनं नतोऽस्मि ।।

**प्र-6 कस्याप्येकस्य विशदम् उत्तरं लिखत।** **10**

1. वामनचरितम् सविस्तरं वर्णयत।
2. मत्स्यावतारकथनाकं विस्तरेण लिखत।

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत।** **10**

1. व्यासनन्दनः कः
2. कयाधुकुमारः अर्थात् कः
3. ब्रह्मसम्मितं पुराणं नाम किम्
4. कः श्रोतव्यः कीर्तितव्यश्च
5. रूपाभिकामो कान् यजेत्
6. तन्तुं तन्वन् कं यजेत्
7. द्वितीय स्कन्धे कति अध्यायाः सन्ति
8. मन्वन्तराणि कति
9. तृतीय मनुः कः
10. दु:ख स्वप्ननाशकं किम्
11. रैवतो कतमो मनु:
12. महापुराणस्य कति लक्षणानि
13. के स्वैः प्राणैः प्राणिनः यान्ति
14. बलेः पितामहः कः
15. पयोव्रतः कस्मिन् मासे भवति

*************